# Shrimat Shankaracharya Sharanagatih

# શ્રીમચ્છઙ્કરાચાર્યશરણાગતિઃ

## Document Information

Text title : Shrimat Shankaracharya Sharanagatih

File name : shankarAchAryasharaNAgatiH.itx

Category : deities_misc, gurudev, shrIdharasvAmI

Location : doc_deities_misc

Author : Shridharasvami

Proofread by : Manish Gavkar

Description/comments : shrIdharasvAmI stotraratnamAlikA

Latest update : February 11, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 12, 2023

*sanskritdocuments.org*

Shrimat Shankaracharya Sharanagatih

# શ્રીમચ્છઙ્કરાચાર્યશરણાગતિઃ

(શિખરિણીવૃત્તમ્)

ન જાનેઽહં તત્ત્વં ન ચ ખલુ તથા તચ્છ્રુતિશિરો
ન યોગે મદ્બુદ્ધિર્ન ચ ખલુ તથા શાસ્ત્રનિપુણઃ ।
ભવાબ્ધિં સન્તર્તું ભવતિ ન ચ નૌઃ કાપિ સુદૃઢા
વિના ત્વત્પાદાબ્જં શ્રિતમિહ દૃઢં શઙ્કરગુરો ॥ ૧॥

ન કર્માનુષ્ઠાનં ન ચ તપસિ લીનં મમ મનો
ન વૈરાગ્યં તાવત્કઠિનતરમાઽશ્રિત્ય જયતિ ।
ભવાબ્ધિં સન્તર્તું ભવતિ ન ચ નૌઃ કાપિ સુદૃઢા
વિના ત્વત્પાદાબ્જં શ્રિતમિહ દૃઢં શઙ્કરગુરો ॥ ૨॥

ન ભક્ત્યાર્ચાં ચક્રે યત ઇહ વિભુસ્તારયતિ માં
ન ગીતા વ્યાખ્યાતા કિમપિ ન ચ શક્યં જડ઼મતેઃ ।
ભવાબ્ધિં સન્તર્તું ભવતિ ન ચ નૌઃ કાપિ સુદૃઢા
વિના ત્વત્પાદાબ્જં શ્રિતમિહ દૃઢં શઙ્કરગુરો ॥ ૩॥

પ્રભો નોપેક્ષ્યોઽયં સ્ફુરતિ હૃદયે કાપિ ચ દયા ।
સમુદ્ધર્તું દીનં ત્વમિહ યત એકોઽસિ ભગવન્ ।
ભવાબ્ધિં સન્તર્તું ભવતિ ન ચ નૌઃ કાપિ સુદૃઢા ।
વિનાત્વત્પાદાબ્જં શ્રિતમિહ દૃઢં શઙ્કરગુરો ॥ ૪॥

મતાનાં વૈચિત્ર્યં કિમપિ ન તથા પ્રીણયતિ માં
પ્રવક્તારં તં વા મતમપિ યતસ્તસ્ય કલયે ।
ભવાબ્ધિં સન્તર્તું ભવતિ ન ચ નૌઃ કાપિ સુદૃઢા
વિના ત્વત્પાદાબ્જં શ્રિતમિહ દૃઢં શઙ્કરગુરો ॥ ૫॥

અવિદ્યાચ્છન્નોઽપિ ત્વદુદિતમિહાકર્ણયતિ યઃ
પરિત્યજ્યાજ્ઞાનં ન ચ કિલ યતઃ પૂર્વવદયમ્ ।
ભવાબ્ધિં સન્તર્તું ભવતિ ન ચ નૌઃ કાપિ સુદૃઢા

વિના ત્વત્પાદાબ્જં શ્રિતમિહ દૃઢં શઙ્કરગુરો ॥ ૬॥

અહો માયા મોહસ્તમપિ તવ પાદાબ્જનિરતઃ
તૃણીકુર્વન્માયાં ભવતિ ચ યતો બ્રહ્મ ભગવન્ ।
ભવાબ્ધિં સન્તર્તું ભવતિ ન ચ નૌઃ કાપિ સુદૃઢા
વિના ત્વત્પાદાબ્જં શ્રિતમિહ દૃઢં શઙ્કરગુરો ॥ ૭॥

સમાયાતં યાતુ સ્ફુરતુ મમ ચિત્તે કિમપિ વા
જગત્પૂજ્યો વા નો તદપિ ન ચ ખિન્નો ન મુદિતઃ ।
ભવાબ્ધિં સન્તર્તું ભવતિ ન ચ નૌઃ કાપિ સુદૃઢા
વિના ત્વત્પાદાબ્જં શ્રિતમિહ દૃઢં શઙ્કરગુરો ॥ ૮॥

પૃથિવ્યાં દાતારઃ પ્રથિતવિભવાઃ સન્તિ બહવઃ
ન મન્યેઽહં તાન્વૈ નિજપદસુદાને બલભૃતઃ ।
નિજાત્મૈક્યં દાતું પ્રભવસિ યતસ્ત્વં બુધતં
ક્ષિતૌ ત્વચ્છ્રેષ્ઠઃ કથય કમહં યામિ શરણમ્ ॥ ૯॥

અયચ્છન્માં કોઽસૌ કિમપિ હિ તરેદ્યો ભવનદીં
જગત્સેતો ત્વં માં વદસિ યદિ મન્યે ત્વયિ ન તત્ ।
સ્વયં પૂર્ણસ્ત્વં ભો નિરવધિનિજાનન્દનિરતો
ન તે પ્રાપ્યં સ્વામિન્ કિમપિ હિ જગત્તારણવિધૌ ॥ ૧૦॥

અયઃપિણ્ડઃ સ્પર્શાત્ સપદિ લભતે હેમપદવીં
પુનર્નૈવાયસ્ત્વં વ્રજતિ ચ તથાપિ સ્ફુટમિદમ્ ।
દદાતિ સ્પર્શોયં કિલ ન નિજરૂપં ક્વચિદપિ
દદાસિ ત્વદ્રૂપં સપદિ નિજશિષ્યાય વિમલમ્ ॥ ૧૧॥

યથા ચણ્ડે સૂર્યે તપતિ ન ચ કલ્પેત તિમિરં
ન માયા દૈન્યં માં યદિ સમુદિતા ત્વત્પદકૃપા ।
અહો માયા વૈરં તદપિ તૃણવદ્ધસ્ય કૃપયા
ત્વદૈક્યં પ્રાપ્તોઽહં યત ઇહ ન ભીઃ શઙ્કરગુરો ॥ ૧૨॥

પયઃ પિણ્ડઃ ક્ષિપ્તો દ્રવતિ ચ યથા સપ્તકિરણૈઃ
સમુદ્રેસઙ્ગચ્છન્ન મમ તથાહઙ્કૃતિરપિ ।
પતન્ બિન્દુઃ સિન્ધૌ ઝટિતિ ભજતે સિન્ધુપદવીં
તથા જાતા ભૂમૌ ત્વયિ નિરવધૌ મત્સ્થિતિરપિ ॥ ૧૩॥

ઇતિ શ્રીમત્ પરમહંસપરિવ્રાજકાચાર્ય સદ્ગુરુ ભગવાન્
શ્રીધરસ્વામીમહારાજવિરચિતા શ્રીશઙ્કરાચાર્યશરણાગતિઃ સમ્પૂર્ણા ।
ગુરુપૂર્ણિમા, રચનાસ્થાનં - કાફી ઉદ્યાનં, ચિક્કમગળૂરુ સંવત્સરઃ ૧૯૪૩

Proofread by Manish Gavkar

---

*Shrimat Shankaracharya Sharanagatih*
pdf was typeset on February 12, 2023

Please send corrections to *sanskrit@cheerful.com*